Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# पाणिनीयव्याकरणस्य वेदाङ्गत्वम्

डॉ0 हरिशंकरमणित्रिपाठी
सहायकप्राध्यापकः, व्याकरणविभागः,
जे. एन. एम. संस्कृत महाविद्यालयः, चाईबासा,
मण्डलम्–पश्चिमी सिंहभूम, झारखण्डराज्यम्, भारतम्



**Article Info**
Volume 4, Issue 1
Page Number : 223-226
**Publication Issue :**
January-February-2021
**Article History**
Accepted : 16 Jan 2021
Published : 30 Jan 2021

**सारांशः** – प्रयोगो वेदे दृश्यते तेषां सर्वेषां शब्दानां निर्वचनं वैदिकैर्धातुभिरेव कर्त्तव्यमित्येष नियमो नास्ति, अपि तु लौकिकसंस्कृतेः प्रसिद्धेभ्यो धातुभ्योऽपि भवति। येषामपि शब्दानां संस्काराय धातवः, पाणिन्यष्टके न व्यपदिष्टास्तेषां व्युत्पत्तये 'उणादयो बहुलम्', (3.3.1) इति सूत्रमुपदिष्टम्। इत्थं हि लौकिकवैदिकोभयशब्दानां साधुत्वक्षमस्य पाणिनिव्याकरणस्य वेदाङ्गत्वं निष्प्रत्यूहमिति।

**मुख्यशब्द :–** पाणिनीयव्याकरणम्, शब्दानाम्, निर्वचनम्, धातवः, वेदे, सज्ञा,अह्निम्।

महाभाष्ये 85 अह्निकानि सन्ति, तेषु मध्ये प्रथमाह्निकं प्रस्तावनारूपम्। अस्याह्निकस्य ''पस्पशा'' संज्ञा, सर्वेतरसिद्धान्तबाधकः पस्पशा। अतिशयेन स्पश्यते इति पस्पश्यते, पस्पश्यते इति पस्पशा। अह्ण निर्वृत्तम् आह्निकम्। पस्पशायाः आह्निकम् पस्पशाह्निकम्। पस्पशा रहिता शब्दविद्या न शोभते इति विदन्त्येव विद्यावन्तः। व्याकरणमहाभाष्ये प्रथमाह्निकं पस्पशाह्निकत्वेन समाख्यातम्। तत्र व्याकरणस्य दार्शनिकं रूपं स्फुटमभिव्यक्तम्। वेदाङ्गेषु व्याकरणस्य मुख्यतमं स्थानम्। 'मुखं व्याकरणं स्मृतम्' इत्यभि–युक्तेक्तिरद्यापि प्रसिद्धा सकलजनानुमोदिता च। वेदाङ्गत्वञ्चास्य शब्दानु–शासनतया तदेव व्याकरणस्य साक्षात् प्रयोजनम्। 'अथ शब्दानुशासनम्' इति ह्यनुवदन् पतञ्जलिरिममेवार्थ प्रत्यपीपदत्। महाभाष्यकार 'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' इत्युक्त्या व्याकरणस्य स्फोटात्मक–ब्रह्मणः तादात्म्याख्यं महत्त्वं विबोधयन्नपि शब्दानुशासनं नाम व्याकरणस्य परमं प्रयोजनमिति स्वीयया नवनवोन्मेषशालिन्या प्रज्ञया संसाधितम्। तत्रादो वेदाङ्गेषु प्रामुख्यं भजमानेषु अस्य व्याकरणशास्त्रस्यैतिहासिकमानुशासनिकञ्च निरूपणं संक्षेपेण प्रस्तूयते।

**[1]अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।**

वेदो हि भारतीयवाङ्मयस्य मूर्धन्यतमो ग्रन्थः। अस्याध्ययनं द्विजन्मनां कृते प्रथमकर्त्तव्यतया सोद्धोषं प्रतिपादयन्ति श्रुतिस्मृत्यादयः। यथोक्तम्'– विद्या ह वै ब्राह्मणमाजगाम, शेवधिष्टेऽहस्मि रक्ष माम्'। माण्डूक्योपनिषद्[2]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

विस्पष्टमा–चष्टे– द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति–परा, चैवापरा च। तत्रापरा–ऋग्वेदो यजुर्वेदः, सामवेदोऽथर्ववेदः शिक्षा, कल्पो, व्याकरणम्, निरूक्तम् छन्दो ज्यौतिषमिति। अथ परा–यया तदक्षरमधिगम्यते।

वेदाध्ययनस्यापरिहार्यतां संसाधयन् भगवान् मनुः ब्रूते–

**[3]योऽनधीत्य द्विजो वेदमन्यत्र कुरूते श्रमम्।**

**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।**

न केवलमङ्गिन एव वेदस्याध्ययनं विधेयम्। अपि तु साङ्गस्यैव वेदस्या–ध्ययनं विहितं सर्वत्राचारशास्त्रे। यथा भगवान् पतञ्जलिः ब्रते–'ब्रह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'। पाणिनिशिक्षायामपि साङ्गवेदाध्ययनस्यैव माहात्म्यमुपनिबद्धं वर्तते। उक्तञ्च[4]–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।।**

**शिक्षा घ्राणन्तु वेदरय मुखं व्याकरणं स्मृतम्।**

**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

उक्तेषु षडङ्गेषु प्रधानं व्याकरणम्। यथोक्तं[5] फणिभाष्ये– प्रधानञ्च षडङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति। तत्र–

**इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**

**पाणिन्यमरजैनेन्द्राः जयन्त्यष्टौ च शाब्दिकाः।।**

इत्यादिरीत्या अष्टविधानि व्याकरणानि व्याख्यातानि। केचित्तु नवधा व्याकरणमित्यपि प्रतिपादयन्ति। तेषु व्याकरणेषु पाणिनिव्याकरणस्यैव प्रामुख्या–मित्यामनन्ति विद्वाँसः। 'काणादं पाणिनीयञ्च सव्रशास्त्रोपकारकम्' इत्युक्तिः सर्वविदितैव।अस्य पाणिनिव्याकरणस्याधारभूतानि अ इ उ ण् प्रभृतीनि सूत्राणिमहेश्वरप्रसादाल्लब्धत्वाच्चतुर्दशसूत्री श्रुतिरित्यवमभ्युक्तैरभ्युहितम्।

महाभाष्य–कृताऽप्युक्तम्[6]–'सोऽययक्षरसमाम्नायो वाक्समाग्नायः पुष्पितः फलितञ्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः इति। भर्तृहरिरप्याह–यथैवेदमव्युच्छिन्नं चन्द्रतारकादि। एवमस्याक्षरसमाग्नास्य न कञ्चिदाधुनिकः कर्त्ताऽसित। एवमेव वेदपार–म्पर्येण स्मर्यमाण इति। अस्य पाणिनिव्याकरणस्य श्रुतिमूलकत्वं समर्थयन् ऋक्तन्त्रव्याकरणे शाकटायनः प्राह–

'इदमक्षरच्छन्दो वर्णशः समनुक्रान्तम्, यथा–ऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजय, भरद्वाज–ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते। न भुक्त्वा, न नक्तं प्रब्रूयाद् ब्रह्मराशिः इति। लघुशब्देन्दुशेखरे

श्रीनागेशेनाप्युक्तम्–'श्रुति–मूलकत्वादस्यैव वेदाङ्गत्वम्'। अत्र हि एव शब्दोऽप्यर्थकः। तेन पाणिनिव्याकरणात् पूर्व वेदस्य पञ्चाङ्गत्वापत्तिः निरस्ता। वस्तुतस्तु विशेश्यसङ्गत एवकारोऽन्ययोगव्यवच्छेदको भवति। यथा– पार्थ एव धनुर्धरः इत्यत्र पार्थेतरावृत्तिर्यद्धनुर्धरत्वं तद्वान् विलक्षणो धनुर्धर इत्यवगम्यते। नैतावता पार्थेतरस्मिन् धनुर्धरत्वं व्यवच्छिद्यते अपि

तु पार्थवृत्ति–विलक्षणधनुधरत्वमन्यस्मिन् नास्तीति गम्यतेऽन्यथा व्यवहारमात्रोच्छेदापत्ति स्यात्तथैवेहापि विलक्षणव्याकरणत्वेन स्वरवैदिकप्रयोगादिनिर्माणनिरूपणकर्तृत्वरूपवैशिष्ट्यस्य चन्द्रादीतरव्याकरणे नास्तीतिविशिष्टं वेदाङ्गत्वमेतस्मिन्नेवेति बोद्धयते। इतरव्याकरणेषु वेदाङ्गत्वं निराक्रियतेऽन्यथा एवशब्दप्रयोगवैयर्थ्यापत्तिः स्यादिति।

पाणिनेः पूर्वं बहूषु व्याकरणेषु सत्स्वप्यस्याष्टकस्य निर्माणे जाते तानि तिरोहितान्येवाभवन्। इदानीं तेषां नामान्येव स्मर्यन्ते। व्याकरणशास्त्रप्रणेतारो बहव आचार्या बभूवुः। महर्षिपाणिनिः स्वस्यामष्टाध्यायां विभिन्नानामाचार्याणां मतवैविध्यप्रदर्शनाय नामग्रहणपूर्वकं तान्निर्दिशति। तत्र च स्फोटायन–गार्ग्य–शाटकायन–आपिशली–गालव–चाक्रवमर्ण–शाकल्याद्यनेकाचार्याणां नामानि स्मर्यन्ते। तद्यथा–

1. **अवङ् स्फोटायनस्य (6.1.123)**
2. **ओतो गार्ग्यस्य (8.3.20)**
3. **त्रिप्रभृतिषु शाकटायनस्य (8.4.50)**
4. **वा सुप्यापिशलेः (6.1.92)**
5. **ई 3 चाक्रवर्मणस्य (6.1.131)**
6. **अड् गार्ग्यगालवयोः (7.3.99)**
7. **लोपः शाकल्यस्य (8.3.19)**

तेष्वाचार्येषु केषाञ्चन मतं विकल्पेन स्वीकृतम्, प्रत्याख्यातमपि केषाञ्चिन्मतम्। तद्यथा सूत्रमुक्तम्–तदशिष्यं संज्ञाप्रमाणत्वात् (1.2.53)।

तत् = प्रकृतम्, युक्तवद्भावलक्षणं निर्दिश्यते तदशिष्यम् = न वक्तव्यम्, संज्ञाप्रमाणत्वात्। संज्ञाशब्दा हि नानालिङ्गसंख्याः प्रमाणम्। तत्र लिङ्गवचनञ्च स्वभावसिद्धमेव न यत्नप्रतिपाद्यम्। तदर्थं सूत्रं नापेक्षितमित्यादिरीत्या खण्डितम्।

'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' (1.2.56) इत्यत्रापि पाणिनिः पूर्वाचार्याणां मतं प्रत्याचष्टे। अथ च पाणिनिना येषामाचार्याणां सिद्धान्तः स्वीयेशास्त्रेऽङ्गीकृतः, तेषां वेदाङ्गत्वं पूर्वत एव सुनिर्णीतम्। तदित्थम्, प्राक्तनव्याकरणानां वेदाङ्गत्वे तदीयपरम्परायां नूतनत्वेनावधेयरूपेणाविर्भूतस्य सर्वथा वैज्ञानिकस्य सर्वाङ्गपूर्णस्य पाणिनिव्याकरणस्य वेदाङ्गत्वमव्याहतमावश्यकञ्च। परमाधुनिकेशु कौमारादिव्याकरणेषु निर्वचनमात्रपरतया तेषां वेदाङ्गत्वं नास्तीति विभाव्यते सुधीभिः। गणरत्नमहोदधौ वर्धमानोपाध्यायेनोक्तम्–

**लौकिकव्यवहारेषु यथेष्टं येष्टताञ्जनः।**
**वैदिकेषु च मार्गेषु विशेषोक्तिः प्रवर्तताम्।।**

वेदेऽपि लौकिका एव शब्दा बाहुल्येन प्रयुज्यन्ते। केचन एव तद्विपरीताः सन्ति तथाविधानो वैदिकशब्दानां व्याख्याने न प्रवर्तन्ते कौमारादिव्याकरणानि। अतः कौमारादिव्याकरणानां न वेदाङ्गत्वं तदुत्तरवर्त्तिषु व्याकरणेषु त्रिमुनि व्याकरणस्यैव वेदाङ्गत्वं सिद्धान्तिम् सर्वत्र। अस्मिन्नेव पाणिनिव्याकरणे स्वरचिन्ता, वैदिकशब्दनिर्वचनञ्च कृतं विद्यते।

पञ्जीकारस्त्रिलोचनदेवो दुर्गसिंहव्याख्याप्रसङ्गे लिखति–वैदिकाः शब्दाः लौकिकज्ञैः पुरूषैः ये यथोक्ताः येन प्रकारेण वेदे प्रतिपादितास्तथैव वे निर्णीतार्थाः ज्ञेयाः। उक्तञ्च–

**वैदिकाः लौकिकज्ञैश्च ये यथोक्तास्तथैव ते।**

**निर्णीतार्थास्तु विज्ञेया लोकात्तेषामसङ्ग्रहः।।**

अद्वैतसिद्धिकृद्भिः[7] मधुसूदनसरस्वतीपादैः स्पष्टमभिधीयते कौमारादि–व्याकरणं न वेदाङ्गत्वं लौकिकपदमात्रव्याख्यानपरत्वात्।

[8]निरूक्तकृद्भिर्यास्कैरूक्तम्–येषां शब्दानां प्रयोगो वेदे दृश्यते तेषां सर्वेषां शब्दानां निर्वचनं वैदिकैर्धातुभिरेव कर्त्तव्यमित्येष नियमो नास्ति, अपि तु लौकिकसंस्कृतेः प्रसिद्धेभ्यो धातुभ्योऽपि भवति। येषामपि शब्दानां संस्काराय धातवः, पाणिन्यष्टके न व्यपदिष्टास्तेषां व्युत्पत्तये 'उणादयो बहुलम्', (3.3.1) इति सूत्रमुपदिष्टम्। इत्त्थं हि लौकिकवैदिकोभयशब्दानां साधुत्वक्षमस्य पाणिनिव्याकरणस्य वेदाङ्गत्वं निष्प्रत्यूहमिति।

**सन्दर्भाः –**

1. ब्रह्मसूत्रभाष्यम् 1.3.28।
2. मुण्डकोपनिषद् 1.2.4।
3. मनु0 अध्याय 2
4. पाणिनीय शिक्षा 41.42।
5. महाभाष्यम्, परपशाहि्नकम् पृष्ठम् 147।
6. महाभाष्यम् झभञ् 1.1।
7. शिवमहिम्नस्तोत्रम् – मधुसूदनी टीका।
8. निरूक्तम् 2.2.6